श्री अंगारक (चॊव्वा) स्त्रोत्रं
(ऋणबाधकळिल् निन्नुं मुक्तिनेटुन्न स्त्रोत्रं)

*स्कन्द उवाच*

चतुर्मुख महाभाग
ब्रूहि तं परमं स्थवं
ऋणाग्रस्ता नरा येन
मुच्यन्ते निखिलात् ऋणात्

*ब्रह्मोवाच*

श्रुणु स्कन्द प्रवक्ष्यामि
लोकानां हितकाम्यया
ऋणहर्त्तुर् मंगळस्य
स्त्रोत्रं सर्व्वार्त्थसिद्धिदं
अस्य श्रि अंगारक स्त्रोत्रमहामन्त्रस्य
ब्रह्माऋषि अनुष्टुप्प् छन्दः
अंगारकोदेवता अंगारकप्रीत्यर्त्थे जपे विनियोगः

**ध्यानं**

रक्तमाल्यांबरधरः
शूलशक्ति गदाधर
चतुर्भुजो मेषगतो
वरदः स्यात्धरासुत (1)

मंगळोभूमि पुत्रश्च
ऋणहर्त्ता धनप्रद
स्थिरासनो महाकायः
सर्व्वकर्म्मावरोधकः (2)

लोहितो लोहिताक्षश्च
सामगानां कृपाकरः
धरात्मजः कुजो भौमो
भूमिजो भूमिनन्दनः (3)

अंगारको यमश्चैव
सर्व्वरोगापहारकः
वृष्टिकर्त्ता वृष्टिहर्त्ता
सर्व्वकामफलप्रदः (4)

एतानि कुजानामानि
नित्यं यः प्रत्ययः पठेत्
ऋणं न जायते तस्य
धनमाप्नोत्यनुत्तमं (5)

रक्तैर्गणतैश्च कुसुमैः
धुपदीपैर् मनोहरैः
मंगळं पुजयित्वा तु
मंगळे ऽ हनिसर्व्वदा (6)

ऋणरेकाः प्रकर्त्तव्याः
अंगारेण तदग्रत
एकविंशति नामानि
पठित्वा च तदन्तिके (7)

ताश्च प्रमार्ज्जयेन्नित्यं
वामभागेन संस्मरन्
एवं कृते न सन्देहः
ऋणान् मुक्तः सुखीभवेत् (8)

महतीं श्रियमाप् नोति
धनदेन समो भवेत्
भ्रमिंच लभते विद्वान्
पुत्रानायुश्च विन्दति (9)

अंगारक महीपुत्रः
भगवान् भक्तवत्सल
नमस्तेस्तु महाभागे
ऋणमाशु विनाशय (10)

ई मन्त्रं जपिच्चु अर्घ्यं नल्कणं

भूमिपुत्र महातेजः
स्वेदोत्भव पिनाकिनः
ऋणार्त्तस्त्वां प्रपन्नोस्मि
ग्रहाणार्घ्यं नमोस्तुते (11)

श्री अंगारक स्तोत्रं संन्पूर्ण्णं